# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-३ (SEM-6) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | ---- | समयः - ११ तः २ |
| दिनाङ्कः - २२/४/२०१६ | सन्दर्भग्रन्थः – किरातार्जुनीयम् – १-२ सर्गौ मल्लिनाथटीकासहितम्) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **एकस्य निबन्धात्मकम् उत्तरं लेख्यम् ।** | ०८ |
| | किरातार्जुनीयस्य श्लोकोल्लेखपूर्वकं कथासारः लेख्यम् ।<br>अथवा<br>महाकाव्यस्य लक्षणानि विलिख्य किरातार्जुनीयस्य महाकाव्यत्वेन मूल्याङ्कनं करणीयम् । | |
| **प्रश्नः -२** | **टिप्पणीद्वयं लेख्यम् ।** | ०८ |
| | (१) भारवेः शैली ।<br>(२) धण्डाप्रथटीकायाः महत्त्वम् ।<br>(३) भारवेः जीवनपरिचयः ।<br>(४) किरातार्जुनीयेऽलङ्कारनिरूपणम् । | |
| **प्रश्नः -३** | **चत्वारः प्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०४ |
| | (१) किरातार्जुनीयस्य फलं किम् ?<br>(२) किरातार्जुनीयस्य मुख्यरसः कः ?<br>(३) कौ मध्यमपाण्डवौ मन्येते ?<br>(४) महाकाव्ये कति सर्गाः भवन्ति ?<br>(५) किरातार्जुनीयस्य आधारग्रन्थः कः ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **द्वयोः ससन्दर्भं मल्लिनाथटीकानुसारं व्याख्या विधेया ।** | ०८ |
| | (१) द्विपां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।<br>स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥<br>(२) कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।<br>तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥<br>(३) पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य निकारमीदृशम् ।<br>भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥ | |
| **प्रश्नः -५** | प्रथमसर्गस्य सारांशः श्लोकोल्लेखपूर्वकं लेख्यः ।<br>अथवा<br>युधिष्ठिरं प्रति वनेचरस्योक्तिः श्लोकोल्लेखपूर्वकं प्रतिपादनीया । | ०८ |
| **प्रश्नः -६** | **टिप्पणीद्वयं नातिविस्तरेण लेख्यम् ।** | ०४ |
| | (१) “हितं मनोहारि च दुर्लभं वचः” इत्यस्य भावार्थः लेख्यः ।<br>(२) प्रथमसर्गस्थः युधिष्ठिरः । (३) वनेचरः । | |

| | | |
|---|---|---|
| | | |
| **प्रश्नः -७** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) "गुणलुब्धां स्वयमेव सम्पदः" इति कस्योक्तिः ?<br>(२) सर्वसम्पदः कुत्र रतिं कुर्वते ?<br>(३) महौजसः इत्यस्य रूपपरिचयं कारयन्तु ।<br>(४) "इषवः" अर्थात् किम् ?<br>(५) "शिवारुतैः" इति शब्दस्य कोऽर्थः ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -८** | **द्वयोः ससन्दर्भं मल्लिनाथटीकानुसारं व्याख्या लेख्या ।** | ०८ |
| | (१) परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।<br>अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥<br>(२) विपदोऽभिभावन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।<br>नियता लघुना निरायतेरगरीयन्न पदं नृपश्रियः ॥<br>(३) सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ।<br>विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ | |
| **प्रश्नः -९** | द्वितीयसर्गस्य सारांशः श्लोकोल्लेखपूर्वकं लेख्यः ।<br>अथवा<br>भीमस्योक्तिः श्लोकोल्लेखपूर्वकं लेखनीया । | ०८ |
| **प्रश्नः -१०** | **टिप्पणीद्वयं नातिविस्तरेण लेख्यम् ।** | ०४ |
| | (१) द्वितीयसर्गस्य विशेषताः ।<br>(२) सर्गद्वये निरूपितं युधिष्ठिरस्य चरित्रचित्रणम् ।<br>(३) युधिष्ठिरं प्रति द्रौपदीकथनम् । | |
| **प्रश्नः -११** | **पञ्चप्रश्नाः एकैकवाक्यद्वारा समाधेयाः ।** | ०५ |
| | (१) वृकोदरः कः ?<br>(२) "प्रभुशक्तिः" इत्यस्य कोऽर्थः ?<br>(३) कति श्लोकाः द्वितीयसर्गे ?<br>(४) द्वितीयसर्गान्ते किं छन्दः ?<br>(५) "कार्मुकम्" अर्थात् किम् ?<br>(६) द्रुपदात्मजा का ? | |

***